शून्यशयनव्रतम्। न तस्य शून्या शय्या स्यादिति” च हेमा० व्रत० ख० भविष्यपुराणम्।

**अशृत** त्रि० न शृतं पक्वम्। अपक्वे पक्वभिन्ने १आमान्नादौ।

**अशेव** त्रि० शी–वनिप् न०त०। सुखकरे। “व्येतु दिद्युद्विषामशेवा” ऋ० ७।३४।१२।

**अशेष** पु० अभावे न०त०। १शेषाभावे। न०त०। २शेषशून्ये सकले त्रि० “अशेषशेमुषीमोषं माषमश्नामि केवलम्” उद्भटः “क्रतोरशेषेण फलेन युज्यताम्” रघुः “येन भूतान्यशेषेण द्रक्ष्यस्यात्मन्यथो मयि” गीता “तथाविधस्तावदशेषमस्तु सः” कुमा०। “अशेषतःशौचमपह्नुताः कमण्डलोः” माघः।

**अशोक** पु० नास्ति शोको यस्मात् ५ब०। १स्वनामख्याते वृक्षे, २बकुलवृक्षे च। ३पारदे न०। ४कटुकवृक्षे स्त्री। ङीप्। ५शोकशून्ये त्रि० ६विष्णौ पु० “सत्यनामा भवाशोकः” “अशोकः शोकनाशनः” इति च विष्णुस०। “अशोकमर्थान्वितनामताशया गतान् शरण्यं गृहशोचिनोऽध्वगान्। अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम्” नैष० “सनूपुररवेण स्त्रीचरणेनाभिताड़नम्। दोहदं तदशोकस्य ततः पुष्पोद्गमो भवेत्” एतदनुसारेणैव कविभिस्तथा वर्ण्यते यथा “असूत सद्यः कुसुमान्यशोकः स्कन्धात् प्रभृत्येव सपल्लवानि। पादेन नापैक्षत सुन्दरीणां संसर्गमाशिञ्जितनूपुरेण” कुमा० नवकिसलयरागेणार्द्रपादेन बाला स्फुरितनखरुचा द्वौ हन्तुमर्हत्यनेन। अकुसुमितमशोकं दोहदापेक्षया वा प्रणमितशिरसं वा कान्तमार्द्रापराधम्” “अनेन तनुमध्यया मुखरनूपुराराविणा नवाम्बुरुहकोमलेन चरणेन सम्भावितः। अशोक! यदि सद्य एव मुकुलैर्न सम्पत्स्यसे मुधा वहसि दोहदमिति” “सर्व्वाशोकलतानां प्रथमं सूचितवसन्तविभवानाम्। शिष्टं ते दोहदेऽस्मिन् संक्रान्तानीव मुकुलानि” इति च मालवि०। अयमशोकः नवपत्रिकान्तर्गतः “कदली दाड़िमी धान्यं हरिद्रा मानकं कचुः। बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिकाः” दु०त०। एतदधिष्ठात्री शोकरहिता “अशोकस्यायै शोकरहितायै” इति दुर्गापूजापद्धतिः। अशोकश्च द्विविधः रक्ताशोकः पीताशोकश्च पीतरक्तपुष्पभेदेन तयोः तथात्वम्। तत्र रक्ताशोकाभिप्रायेण “अशोकनिर्भर्त्सितपद्मरागम्” कुमा०। “रक्ताशोकलताविशेषितगुणो-बिम्बाधरालक्तकः” मालवि० पीताशोकवर्णन तु मालविकाग्निमित्रे तृतीयाङ्के तपनीयाशोकवर्णने दृश्यम्। “अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लवः। कङ्केलिः पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा। अशोकः शीतलः स्निग्धो ग्राही वर्ण्यः कषायकः। दोषापचीतृषादाहकृमिशोषविषास्रजित्” भा०प्र० पर्य्यायगुणादि। चान्तः शोकाभावे त्रिका०।

**अशोकतीर्थ** न० अशोकनामकं तीर्थम्। काशीक्षेत्रान्तर्गते तीर्थभेदे। काशीस्थप्रयागतीर्थमधिकृत्य “अशोकाख्यमिदं तीर्थं गन्धकेशव एष वै। मोक्षद्वारमिदं श्रेष्ठं स्वर्गद्वारमिदं विदुः”। काशी०।

**अशोकत्रिरात्र** न० न शोको यत्र तादृशं त्रिरात्रम्। हेमा० व्र० ख० भविष्योत्तरोक्ते व्रतभेदे तत्कालादिस्तत्रैवोक्तः “अस्त्यशोकत्रिरात्राख्यं व्रतं शोकभयापहम्। त्रिरात्रं तच्च कर्त्तव्यं व्रतं शोकविनाशनम्” इत्युपक्रम्य, मासि मार्गशिरे चैव ज्येष्ठे भाद्रपदे तथा। शुक्लपक्षे पञ्चदश्यामेकभक्तं तु कारयेत्” इत्यादिना आरम्भकालमुक्त्वा “अनेनैव विधानेन प्रतिमासं च पूजयेत् यावत् द्वादश मासान् वै कुर्य्यादुद्यापनं ततः” इत्युक्तम्।

**अशोकपूर्णिमा** स्त्री नास्ति शोको यस्याः कर्म्म०। फाल्गुनपौर्णमासावधिवर्षपर्य्यन्तायां हेमा० व्र० ख० विष्णुधर्म्मोक्तव्रताङ्गे १पौर्णमास्यां तत्र प्रतिमासं कर्त्तव्ये २व्रते च यथा “अशोकपूर्णिमामेतां शृणुष्वैकमना मम। उपोष्य न नरः शोकं प्राप्नोति स्त्री तथाऽपि वा। फाल्गुनामलपक्षस्य पौर्णमास्यां नृपोत्तम”। इत्युपक्रम्य विधानमुक्त्वा “अनेनैव प्रकारेण चत्वारः फाल्गुनादयः उपोष्या नृपते मासाः” इत्युक्त्वा च “आषाढादिषु मासेषु तद्वत् प्रोक्तं तथाम्बुना। चतुर्ष्वन्येषु च प्रोक्तं तथा वै कार्त्तिकादिषु” इत्यनेन वर्षसाध्यत्वमस्या उक्तम्।

**अशोकरोहिणी** स्त्री अशोक इव रोहति रुह–णिनि। कट्कीति ख्यातायाम् कटुकायां कटुकाशब्दे विवृतिः।

**अशोकषष्ठी** स्त्री कर्म्म०। चैत्रोभयषष्ठ्याम् तत्र षष्ठीदेवीपूजनविधानात्तथात्वम्, “चैत्रे मासि सिते पक्षे षष्ठ्यां षष्ठीं प्रपूजयेत्। सुखाय पुत्रलाभाय शुक्लपक्षे तथैव च” उत्तरकामाख्यातन्त्रम्।

**अशोका** स्त्री नास्ति शोकोदुःखं सेवनादस्याम्। १कटुकायाम् (कटकी) शब्दा० ढक् आशोकेयस्तद्भवे त्रि०। २चैत्रशुक्लषष्ठ्याञ्च “सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी। वैशाखे चान्दनीत्युपक्रम्य चैत्रेऽशोका प्रकीर्त्तिता” स्क० पु० परिभाषोक्ता।

**अशोकारि** पु० अशोकं शोकाभावमृच्छति ऋ–इन् ६त०।